International Journal of Sanskrit Research 2015; 1(7): 57-59

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(7): 57-59
© 2015IJSR
www.sanskritjournal.com
Received: 01-09-2015
Accepted: 04-10-2015

शुभेन्दु मण्डल
गवेषकः, संस्कृत-पालि-प्राकृत-विभागः,
विश्वभरती, शान्तिनिकेतनम्, पश्चिमवङ्ग

Correspondence
शुभेन्दु मण्डल
गवेषकः, संस्कृत-पालि-प्राकृत-विभागः,
विश्वभरती, शान्तिनिकेतनम्, पश्चिमवङ्ग

# नलचम्पूकाव्यस्य प्रथमोच्छवासे श्लेषालङ्कार

**शुभेन्दु मण्डल**

**विषयसंक्षेपः-** चम्पूकाव्यरचनायां दशमशतकस्य त्रिविक्रमभट्टस्य विशिष्टमेकं स्थानं वर्तते। 'मदालसा', 'नलचम्पूः' चेति नामकं चम्पूद्वयं विरचितवान् सः । तयोः नलचम्पूकाव्यस्य प्रथमोच्छवासस्य श्लेषालङ्काराणां वैचित्रविश्लेषणं मम सन्दर्भस्यास्य विषयः । नलदमयन्त्योः प्रणयकथामवलम्व्य कविना काव्यमेतद् चित्रितम् । ग्रन्थेऽस्मिन् विभिन्नानामलङ्काराणामवस्थानत्वेदपि प्रधानतया श्लेषालङ्कारस्यैव प्राचुर्यं परिदृश्यते । श्लेषालङ्कारस्य लक्षणविषये सहित्यदर्पणकारेण विश्वनाथेनोक्तम् –"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते॥" अतः तन्मते अनेकार्थवाचकपदेन अनेकार्थभिधानं श्लेषः इति । अस्मिन् नलचम्पूकाव्ये श्लेषालङ्कारस्य प्रयोगः यथा –"भूमयो वहिरन्तश्च नानारामोपशोभिताः ।/ओकुर्वन्ति सर्वदा यत्र विचित्र वयसां मुदम् ॥" (नलचम्पूः - १/३१) - अत्र 'नानारामोपशोभिताः' इति वाक्यांशे द्वे अर्थे प्रतिपादिते । प्रथमतया 'नाना + आराम + उपशोभिताः' - अर्थात् विविध उद्यानाभ्यां शोभिताः । पुनः 'नाना + रामा + उपशोभिताः' – अर्थात् विविध सुन्दररमण्याः शोभिताः । अतः 'नानारामोपशोभिताः' इथ्थं श्लिष्टवाक्यांश- प्रयोगेन त्रिविक्रमभट्टः नगर्य्याः वहिर्देशस्य अन्तःपुरस्य च वर्णनं युगपत् कृतवान् । अस्य नलचम्पूकाव्यस्य प्रथमोच्छवासस्थितानां कतिपय-श्लेषालङ्काराणां वैचित्रविश्लेषणं मम सन्दर्भस्यास्य विषयः ।

**कुञ्जिशब्दाः-** नलचम्पूः, श्लेषालङ्कारः, त्रिविक्रमभट्टः, सभङ्गश्लेषः, अभङ्गश्लेषः, चम्पूकाव्यम् इत्यादयः।

- समाजस्य दर्पणः खलु साहित्यम् । भाषादृष्ट्या साहित्यं द्विविधम् – लोकिकं वैदिकं च । शैलीदृष्ट्या लौकिकसाहित्यमपि गद्यपद्यचम्पूभेदेन त्रिधा । अद्यावधि ज्ञातेषु हि चम्पूकाव्येषु त्रिविक्रमभट्टस्य नलचम्पुः एव प्रथमत्वेन गृह्यते । पण्डिताः मन्यन्ते 'नलचम्पूः', 'मदालसाचम्पूः' चेति चम्पूद्वयं विरचितवान् सः । महाभारतस्य नलदमयन्त्योः प्रणयकथामवलम्व्य त्रिविक्रमभट्टेण नलचम्पूकाव्यं चित्रितम् । ग्रन्थेऽस्मिन् विभिन्नानामलङ्काराणामवस्थानत्वेदपि प्रधानतया श्लेषालङ्कारस्यैव प्राचुर्यं परिदृश्यते । अस्य नलचम्पूकाव्यस्य प्रथमोच्छवासस्य श्लेषालङ्काराणां सौन्दर्यविश्लेषणं मम सन्दर्भस्यास्य विषयः ।

## कविपरिचय

त्रिविक्रमभट्टः शाण्डिल्यगोत्रसम्भूतः ब्राह्मणरासीत् । तस्य पितामहस्य नाम श्रीधरः, पितुः नाम नेमादित्य आसीदिति । त्रिविक्रमभट्टः तस्य ग्रन्थे गुणाढ्यवाणयोः उल्लेखं कृतवान् अपि तु भोजराजविरचिते 'सरस्वतीकण्ठाभरणे' नलचम्पूकाव्यस्य श्लोकमुद्धृतमस्ति । अतः त्रिविक्रमभट्टस्य समयः दशमशतकस्य आदिभागः इति स्वीकुर्वन्ति पण्डिताः ।

## चम्पूकाव्यपरिचय

सप्त उच्छवाससमन्वितम् एतत् काव्यं चम्पूकाव्यमिति । एतद् मिश्रकाव्यरूपेणापि परिगणयितुं शक्यते । चम्पूकाव्यस्य लक्षणमस्ति अग्निपुराणे –

> "मिश्रं वपुरिति ख्यातं प्रकीर्णमिति च द्विधा ॥" (अग्निपुराणम् – ३३७/३८)

- काव्यादर्शग्रन्थस्य प्रथमपरिच्छेदे चम्पूकाव्यविषये दण्डाचार्येन उक्तम् –

  > "गद्यपद्यमयि काचिच्चम्पूरित्यभिधीयते ॥" (काव्यादर्शः - १/३१)

- साहित्यदर्पणकारेण विश्वनाथेनोक्तम् –

"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।।" (साहित्यदर्पणः – ६/३३५)

- आचार्यः हेमचन्द्रः तस्य काव्यानुशासने उक्तवान् –

"गद्यपद्यमयी सांका सोच्छवासा चम्पूः ।।" (काव्यानुशासनम् – ८/९)

- केनापि चम्पूविषये उक्तम्-

"चमत्कृत्य पुनानि सहृदयान् विस्मितीकृत्य प्रसादयति इति चम्पुः ।।"

इत्थं परिदृश्यते चम्पूलक्षणविषये आचार्यानां सम्पूर्णं मतैक्यं नास्ति । किन्तु सामान्यतया वक्तुं शक्यते रचनाशैली काहिनीविन्यास-परिच्छेदविभागादयश्चापि चम्पूलक्षणान्विताः । अस्य काव्यस्य कथा इतिहासप्रसिद्धा । नलचम्पूकाव्ये निषधराजेन नलेन सह विदर्भराजकन्यायाः दमयन्त्याः प्रमोपाख्यानं कविना त्रिविक्रमभट्टेण वर्णितम् ।

***कथासारः*** –

नलचम्पूः सप्तसंख्यकाः उच्छवाससमन्विताः । नलछम्पूर्हि दमयन्तिकथाप्युच्यते । 'नलचम्पूः' भवति निषधराजेन नलेन सह विदर्भराजकन्यायाः दमयन्त्याः प्रणयकथा । अस्मिन् काव्ये आर्यावर्तवर्णनमारम्भ नलदमयन्तीपरिणयपर्यन्ता प्रेमोख्यानकथा कथा वर्णिताऽस्ति । काव्येऽस्मिन् पान्डित्यप्रदर्शनार्थं कथावस्त्वनपेक्षा, रसपरिपाकपेक्षया शाव्दक्रीडायाः प्रधान्यं परिदृश्यते ।

***श्लेषालङ्कारविश्लेषणम्***

शृङ्गाररसप्रधानस्य अस्य काव्यस्य भाषा ओजः-कान्ति-प्रसादगुणैश्च गुणसमन्विता । नानालङ्कारसमृद्धेऽस्मिन् काव्ये श्लेषालङ्कारस्यैव वाहुल्यं परिदृश्यते । यतः कविनोक्तं –

"प्रसन्नाः कान्तिहारिण्यो नाना श्लेषविचक्षणाः ।"(नलचम्पूः प्र.उ.१/३)

तेषु सभङ्गश्लेषालङ्कारे तस्यासक्ति विषये तेनैव उक्तम् –

"वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः ।
नोद्वेगस्तत्र कर्तव्यो यस्मान्नैकोरसः कवेः ।।"(नलचम्पूः प्र.उ.१/१६)

श्लेषालङ्कारस्य लक्षणविषये साहित्यदर्पणकारेण विश्वनाथेनोक्तं –

"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।
वर्ण-प्रत्यये-लिङ्गानां प्रकृत्योः पदयोरपि ।
श्लेषाद्विभक्ति-वचन-भाषाणामष्टधा च सः ।।"(साहित्यदर्पणः – १०/१३)

अनेकार्थवाचकपदैः अनेकार्थाभिधानेन श्लेषः इति । वर्णश्लेषः, प्रत्ययश्लेषः, लिङ्गश्लेषः, प्रकृतिश्लेषः, पदश्लेषः, विभक्तिश्लेषः, वचनश्लेषः, भाषाश्लेषश्चेति स श्लेषः अष्टधा । अन्यदृष्ट्या श्लेषालङ्कारस्य भेदविषये दर्पणकारेणोक्तं –

"पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः ।"(साहित्यदर्पणः – १०/१४)

- ***काव्येऽस्मिन् सभङ्गश्लेषालङ्कारस्य प्रयोगसौन्दर्यं यथा*** –

अक्षमालापवृत्तिज्ञा कुशासनपरिग्रहा ।
ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला ।।"(नलचम्पूः प्र.उ.१/७)

श्लोकस्यास्य परिनिष्ठितोदर्थो भवति – अकारणाविष्कृतवैराणां खलानां सभा दूरतः एव त्यक्तव्या । अत्र दुर्जनसभाया विप्रसभायाः शाव्दीतुल्यता निर्दिष्टा । अत्र 'अक्षमालापवृत्तिज्ञा' इत्यांशे 'कुशासनापरिग्रहा' इत्यांशे च सभङ्गश्लेषः परिदृश्यते । तत्र दुर्जनसभापक्षे 'अक्षम्+आलाप+वृत्ति+ज्ञा' इत्यत्र कथन-व्यवहारज्ञा इत्यर्थः ; 'कु+शासन+परिग्रहा' इत्यत्र कुशिक्षादात्रीति अर्थः कवेरीप्सितेति । विप्रसभापक्षे तु 'अक्ष+माला+अपवृत्तिज्ञा' इत्यत्र अक्षमालाजपविधिज्ञा इत्यर्थः । 'कुश+आसन+परिग्रहा' इत्यत्र कुशासन-संयुक्ता इत्यर्थश्च कवेरभिप्रायः । पदभङ्गेनार्थद्वयलाभादत्र सभङ्गश्लेषालङ्कारः ।

- ***अपि च*** –

"जननीतिमुदितमनसा सततां सुस्वामिना कृतानन्द ।
सा नगरी नगतनया गौरीव मनोहरा भाति ।।"(नलचम्पूः प्र.उ.१/३०)

***अस्य श्लोकस्य पार्यन्तिकोऽर्थः*** सा आर्यावर्तनगरी गौरीव मनोहरा भाति । तत्र 'जननीतिमुदितमनसा' पदस्य नगरीपक्षे अन्वयो भवति 'जन+निति+मुदित+मनसा' अर्थात् जनसामान्यव्यवहारेण प्रसन्नचित्ता इति । 'नगतनया' पदस्य नगरीपक्षे अन्वयो भवति 'न+गत+नया' अर्थात् न विगतनया इति । पार्वतीपक्षे तु पदद्वये यथाक्रमं - 'जननी+इति+मुदित+मनसा'- अर्थात् मातेति हेतोर्हृष्टमनसा कार्त्तिकेयेन, 'नग+तनया'- अर्थात् पर्वतपुत्री गौरी चेति अर्थद्वयमुपलभ्यते ।

- ***पुनः*** –

"संगता सुरसार्थेन रम्या मेरुचिराश्रया ।
नन्दनोद्यानमालेव स्वस्थैरालोक्यतां कथा ।।"(नलचम्पूः प्र.उ.१/२४)

***श्लोकस्यास्य अर्थः*** औचित्यं हि रसस्य परमरहस्यम् । तत्र नन्दनवनपक्षे 'सुरसार्थ' पदस्य अन्वयो भवति – 'सुर+सार्थ'- अर्थात् देवानां संगता इति । परन्तु कथापक्षे 'सुरसार्थ' पदस्य अन्वयो भवति 'सुरस+अर्थ'- अर्थात् शोभनो रसः शृङ्गारादिर्यत्र तथोक्तेनार्थेन संगतोचिता । एवमेव सभङ्गश्लेषमयपदेन कविः पाठकवर्गमाह्लादयति ।

- ***इत्थं*** –

"भूमयो वहिरन्तश्च नानारामोपशोभिताः ।
कुर्वन्ति सर्वदा यत्र विचित्र वयसां मुदम् ।।"(नलचम्पूः प्र.उ.१/३१)

अत्र 'नानारामोपशोभिताः' इति वाक्यांशेद्वे अर्थे प्रतिपादिते .। प्रथमतया 'नाना + आराम + उपशोभिताः' - अर्थात् विविध उद्यानाभ्यां शोभिताः । पुनः 'नाना + रामा + उपशोभिताः' – अर्थात् विविध सुन्दररमण्याः शोभिताः । अतः 'नानारामोपशोभिताः' इत्थं श्लिष्टवाक्यांशप्रयोगेन त्रिविक्रमभट्टः नगर्य्याः वहिर्देशस्य अन्तःपुरस्य च वर्णनं युगपत् कृतवान् ।

- ***अपि च*** –

"कान्तारागप्रियाः करिणो राजद्वारेषु संचरन्ति वेश्याङ्गणेषु भुजङ्गाः ।"(नलचम्पूः प्र.उ.)

अत्र 'कान्तारागप्रियाः' पदस्य द्वे अर्थे प्रतिपादिते । करीपक्षे 'कान्तारागप्रियाः' पदस्य अन्वयो भवति – 'कान्तार+अग+प्रियाः'- अर्थात् वृक्षप्रियः ; विटपक्षे तु अन्वयो भवति – 'कान्ता+राग+प्रियाः'- अर्थात् कान्तावधूः प्रियः ।

- किन्तु न केवलमत्र सभङ्गश्लेषालङ्काराणामेव झङ्कारो परिदृश्यते अपि तु अभङ्गश्लेषालङ्काराणां प्रयोगोऽपि नाकिञ्चित्कर इति । काव्येऽस्मिन् अभङ्गश्लेषालङ्कारस्य प्रयोगः यथा –

"अगाधान्तः परिस्पन्दं विवुधानन्दमन्दिरम् ।
वन्दे रसान्तरप्रौढं स्रोतः सारस्वतं वहत् ।।"(नलचम्पूः प्र.उ.१/३)

नदीवर्णनपरोऽयं श्लोकः श्लेषेण भारतीवन्दनमपि प्रकटयति । तद् यथा 'अगाधान्तःपरिस्पन्दं' शव्दः नदीपक्षे अगाधो गम्भीरः अन्तः मध्ये परिस्पन्दः तरङ्गविशेषः इत्यर्थः, वाणीपक्षे तु गम्भीरे मनसि चमत्कारी स्फूर्तिविशेषो यस्य इत्यर्थः, इथ्थम् 'विवुधानन्दमन्दिर' शव्दः नदीपक्षे देवानां हर्षस्थानमित्यर्थः; वाणीपक्षे तु पण्डितानां हर्षस्थानमित्यर्थः । पुनः 'रसान्तरप्रौढ' शव्द नदीपक्षे भूमेरन्तरे मध्ये प्रवहति स्म इत्यर्थः, वाणीपक्षे तु शृङ्गारादि रसानां समृद्धम् इत्यर्थः । अत्रापि अभङ्गश्लेषशव्देन कविः पाठकवर्गमाह्लादयति ।

- ***अपि च*** –

"निश्चितं ससुरः कोऽपि न कुलीनः समेऽमतिः ।

सर्वथासुरसंबद्धं काव्यं यो नभिनन्दति ॥"(नलचम्पूः प्र.उ.१/१०)

अत्रापि काव्यवर्णनपरोऽयं श्लोकः श्लेषेण भृगुमुनेः वर्णनमपि प्रकटयति । 'ससुरः' शव्दः काव्यपक्षे मद्यपः इत्यर्थः, भृगुपक्षे तु असुरसम्वन्धीयः इत्यर्थः । इत्थं 'सुरसं' शव्दः काव्यपक्षे शृङ्गारादयो रसाः वद्धं काव्यं इत्यर्थः, भृगुपक्षे तु देवः इत्यर्थः प्रतीयते ।

❖ ***अभङ्गश्लेषस्य अन्यानि उदाहरणानि यथा –***

"व्यासः क्षमाभृतां श्रेष्ठो वन्धः स हिमवानिव ।

सृष्टा नौरीदृशी येन भवे विस्तारिभरता ॥"(नलचम्पूः प्र.उ.१/१२)

श्लोकेऽस्मिन् महाभारतकारः व्यासवर्णनपरः श्लेषेण हिमालयस्य वर्णनमपि प्रकटयति । तद् यथा – 'क्षमाभृतां श्रेष्ठः' शव्दः व्यासपक्षे क्षान्तानां श्रेष्ठः इत्यर्थः, हिमालयपक्षे तु भुभृतां श्रेष्ठः इत्यर्थः । इत्थं 'गौरीदृशी, शव्दः व्यासपक्षे वाक् इत्यर्थः, किन्तु हिमालयपक्षे तु शंकरपुत्री गौरी इत्यर्थः । पुनः 'भवे' शव्दस्य व्यासपक्षे अर्थः संसारे, परन्तु हिमालयपक्षे तु अर्थः महादेवः शंकरः । इत्थं 'विस्तारिभारता' शव्दस्यार्थः व्यासपक्षे विस्तरणशीलं महाभारतम्, परन्तु हिमालयपक्षे शव्दस्यार्थः 'विस्तारिभा' अर्थात् विकाशशीला कान्तिर्यस्याः, 'रता' अर्थात् अनुरक्ताः शिवे अनुरक्तै वा । एवमेव कविः त्रिविक्रमभट्टः काव्येऽस्मिन् अभङ्गश्लेषसौन्दर्येण पाठकान् आह्लादयति ।

***अपि च –***

"उदात्तनायकोपेता गुणवदवृत्तमुक्तका ।

चम्पूश्च हारयष्टिश्च केन न क्रियते हृदि ॥"(नलचम्पूः प्र.उ.१/२५)

चम्पुकाव्यवर्णनपरोऽयं श्लोकः श्लेषेण हारलतायाः वर्णनमपि प्रकटयति । 'उदात्तनायकोपेता' शव्दस्य चम्पूपक्षे धीरोदात्तगुणान्वितः नायकसम्पन्नः इत्यर्थः, हारलतापक्षे तु महार्घेण नायकेन हारमध्यरत्नेनोपेता इत्यर्थः । इत्थं 'गुणवदवृत्तमुक्तका' शव्दः चम्पुपक्षे ओजः-प्रसादादि-गुणयुक्तं गद्यपद्यमयी चम्पूः इत्यर्थः, हारलतापक्षे तु तन्तुमत्यो वृत्तमुक्तावर्तुलमौक्तिकानि संयुक्ताः इत्यर्थः प्रतीयते । अत्रापि अभङ्गश्लेषेण कविः चम्पूहारलतयोः सौन्दर्यं युगपत् कृतवान् ।

❖ ***पुनः अन्या यथा –***

"तस्य विषयमध्ये निषधो नामास्ति जनपदः प्रथितः ।

तत्र पूरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति ॥"(नलचम्पूः प्र.उ.१/२९)

इत्यत्र 'पुरुषोत्तम'-शव्दे द्वे अर्थे प्रतिपादिते । प्रथमतया नरश्रेष्ठः, पुनः भगवान् विष्णुः इति युगपत् अर्थस्य वर्णनं कृत्वा कविः त्रिविक्रमभट्टः पाठकवर्गं आनन्दयति ।

➢ ***इत्थं 'नलचम्पू'-काव्यस्य पदे पदे श्लेषालङ्कारस्य प्रयोगनैपूण्यं सहृदयहृदयं नितरामाह्लादयतीति दिक् ।***

***सहायक-ग्रन्थपञ्जी***


1. त्रिविक्रमभट्ट । नलचम्पूः । स. कैलाशपति त्रिपाठी । नलचम्पुः । चौखम्वा संस्कृत संस्थान; वाराणसी । १९७७ ।
2. कविराज विश्वनाथ । साहित्यदर्पणः । स. शालग्राम शास्त्री वाचस्पति । साहित्यदर्पणः । दिल्ली; भारतीय कला प्रकाशन । २००८ ।
3. दण्डी । काव्यादर्शः । स. अनिल चन्द्र वसु । काव्यादर्श (प्रथम परिच्छेद) । कलिकाता; संस्कृत वुक डिपो । २०१४ ।
4. भट्टाचार्य, चिरञ्जीव । माधवचम्पूः । स. प्रत्नकम्ननन्दिनी । माधवचम्पू । कलिकाता । १८७१ ।
5. Sandhyakaranandi. ramacaritam.ed. Haraprasadsastri.ramacaritam of sandhyakaranandin. revised eng. Trans. And notes Radhagovinda Basak. The Asiatic Society. Kolkata. reprint 2012.
6. विश्वनाथकविराजः ; साहित्यदर्पणः, स. उदयचन्द्र-वन्दोपाध्याय । साहित्यदर्पणः (दशम-परिच्छेदः); संस्कृत-वुक-डिपो,२८/१ विधानसरणी, कलिकाता-६ ; संस्करणः- जुलाइ २००६.
7. मम्मटभट्टः ; काव्यप्रकाशः, स. विजया गोस्वामी (९म-१०म उल्लासः) ; काव्यप्रकाश । संस्कृत-पुस्तक-भाण्डारः, ३८ विधानसरणी, कलिकाता-६ ; संस्करणः- सन १४०४.
8. संस्कृतसाहित्येतिहासः ; स. लोकमणि दाहाल ; चौखम्वा कृष्णदास अकादमी । वाराणसी । २०११ ।